**MASTER OF ARTS EXAMINATION, 2018**
**(SPECIAL SUPPLEMENTARY)**
(2nd Year 3rd Semester)
**SANSKRIT**
**Course: XI**
**[Sanskrit Prose]**

Time: Two Hours — Full Marks: 30

*The figures in the margin indicate full marks*

**क–विभागः**

**(चम्पूरामायणम्)**

१. सुरगिरा देवनागर्या लिप्या पञ्च प्रश्नाः समाधेयाः। 1X5=5

(क) *तदनु शूलमखण्डयदञ्जसा* – अत्र अखण्डयद् इति क्रियायाः कः कर्ता?

(ख) विराधः केन हेतुना राक्षसत्वं प्राप्तः?

(ग) दण्डकारण्ये सालषण्डस्य विटपाः केन कारणेन विषमिताः?

(घ) क आसीत् सुबाहुः? कस्तं जघान?

(ङ) काननक्षमा कथं खननक्षमा अभवत्?

(च) कयोः राक्षसयोः मरणाद् अनन्तरं खरः राघवम् आहवाय आ ह्वयत?

(छ) क आसीत् सुबाहुः? कस्तं जघान?

२. सुरगिरा देवनागर्या लिप्या पदपञ्चकस्य अर्थाः देयाः। 1X5=5

प्राक्रमेताम्, विस्रगन्धिना, पललभ्रमेण, निरपत्रपम्, क्रव्याशः, शिलीमुखान्, कुतस्त्यौ, शापव्यापदम्।

३. *चम्पूरामायण*–स्य आरण्यकाण्डम् आश्रित्य शूर्पणखावृत्तान्तः समुप स्थाप्यताम्। 5

*अथवा,*

हेमन्ताविर्भावः केषां कृते क्लेशजनकः?

**ख–विभागः**

**(हर्षचरितम्)**

४. सुरगिरा देवनागर्या लिप्या पञ्च प्रश्नाः समाधेयाः। 1X5=5

(क) भासः कीदृशैर्नाटकैर्यशो लेभे?

(ख) सुग्रीवपक्षे प्रवरसेनशब्दः व्याख्येयः।

(ग) उदीच्येषु प्रतीच्येषु च कीदृशं काव्यं समादृतम्?

(घ) कैर्विज्ञाप्यमानो द्वितीयराज्यवर्धनः कथं कथमप्यभुक्त?

(ङ) क आसीत् संवादकः?

(च) देवो हर्षः स्नात्वा कुत्र प्रसारितमूर्तिः समवातिष्ठत?

(छ) चक्रवाकचक्रवालं केन बाध्यमानम् आसीत्?